CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

PAPER 1. Prescribed Texts

**MAY/ JUNE 2017**

Additional materials:
Answer paper

**TIME** 2 1/2 hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

---

This question paper consists of 9 printed pages.

**1** *Buddhacarita of Aśvaghoṣa*

**(i)** एवं जरा हन्ति च निर्विशेषं स्मृतिं च रूपं च पराक्रमं च।
न चैव संवेगमुपैति लोकः प्रत्यक्षतोऽपीदृशमीक्षमाणः॥

एवं गते सूत निवर्तयाश्वान् शीघ्रं गृहाण्येव भवान्प्रयातु।
उद्यानभूमौ हि कुतो रतिर्मे जराभये चेतसि वर्तमाने॥

अथाज्ञया भर्तृसुतस्य तस्य निवर्तयामास रथं नियन्ता।
ततः कुमारो भवनं तदेव चिन्तावशः शून्यमिव प्रपेदे॥

यदा तु तत्रैव न शर्म लेभे जरा जरेति प्रपरीक्षमाणः।
ततो नरेन्द्रानुमतः स भूयः क्रमेण तेनैव बहिर्जगाम॥

अथापरं व्याधिपरीतदेहं त एव देवाः ससृजुर्मनुष्यम्।
दृष्ट्वा च तं सारथिमाबभाषे शौद्धोदनिस्तद्गतदृष्टिरेव॥

स्थूलोदरः श्वासचलच्छरीरः स्रस्तांसबाहुः कृशपाण्डुगात्रः।
अम्बेति वाचं करुणं ब्रुवाणः परं समाश्रित्य नरः क एषः॥

*Canto 3, vv 36 to 41*

**(a)** Translate lines 1 to 4, *'evaṃ ... vartamāne'.* [4]

**(b)** Translate and name the types of the following compounds:

- **(i)** *'bhartṛsutasya'* (line 5)
- **(ii)** *'cintāvaśaḥ'* (line 6) [4]

**(c)** In this passage the young prince is shown two evils of existence. What are these and what is the third evil he will witness? [2]

(ii) कृशोऽप्यकृशकीर्तिश्रीर्ह्लादं चक्रेऽन्यचक्षुषाम् ।
कुमुदानामिव शरच्छुक्लपक्षादिचन्द्रमाः ॥

त्वगस्थिशेषो निःशेषैर्मेदःपिशितशोणितैः ।
क्षीणोऽप्यक्षीणगाम्भीर्यः समुद्र इव स व्यभात् ॥

अथ कष्टतपःस्पष्टव्यर्थक्लिष्टतनुर्मुनिः ।
भवभीरुरिमां चक्रे बुद्धिं बुद्धत्वकाङ्क्षया ॥

नायं धर्मो विरागाय न बोधाय न मुक्तये ।
जम्बुमूले मया प्राप्तो यस्तदा स विधिर्ध्रुवः ॥

न चासौ दुर्बलेनाप्तुं शक्यमित्यागतादरः ।
शरीरबलवृद्ध्यर्थमिदं भूयोऽन्वचिन्तयत् ॥

क्षुत्पिपासाश्रमक्लान्तः श्रमादस्वस्थमानसः ।
प्राप्नुयान्मनसावाप्यं फलं कथमनिर्वृतः ॥

निर्वृतिः प्राप्यते सम्यक् सततेन्द्रियतर्पणात् ।
संतर्पितेन्द्रियतया मनःस्वास्थ्यमवाप्यते ॥

*Canto 12, vv 98 to 104*

**(a)** Translate lines 1 to 4, *'kṛśo ... vyabhāt'.* [4]

**(b)** Translate and name the types of the following compounds:

**(i)** '*kaṣṭatapaḥspaṣṭavyarthakliṣṭatanuḥ'* (line 5)
**(ii)** *'āgatādaraḥ'* (line 9) [6]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)**

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥

पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च॥

एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गणौ॥

इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्।
संनियम्य तु तान्येव ततः सिद्धिं नियच्छति॥

*Chap. 1, vv 89 to 91; Chap. 2, vv 92 and 93*

**(a)** Translate and name the types of the following compounds:

**(i)** *'aprasaktiḥ'* (line 2)
**(ii)** *'vaṇikpatham'* (line 4) [4]

**(b)** Scan lines 5 and 6, *'ekam eva ... anasūyayā'* and name the metre. [3]

**(c)** Translate lines 9 and 10, *'indriyāṇāṃ ... niyacchati'.* [3]

(ii) तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥

तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥

तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु ॥

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥

समीक्ष्य स धृतः सम्यक्सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥

यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन्दुर्बलान्बलवत्तराः ॥

*Chap. 7, vv 14 to 16 and 18 to 20*

**(a)** Translate lines 1 to 4, *'tasyārthe ... calanti ca'.* [4]

**(b)** Translate and name the types of the following compounds:

**(i)** *'anyāyavartiṣu'* (line 6)
**(ii)** *'atandritaḥ'* (line 11) [4]

**(c)** Explain briefly the importance of lines 11 and 12. [2]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

(i) शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ।
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति॥

तस्मै स होवाच। द्वे विद्ये वेदितव्ये इति ह स्म
यद्ब्रह्मविदो वदन्ति परा चैवापरा च॥

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः
शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।
अथ परा यया तदक्षरमधिगम्यते॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्ण-
मचक्षुःश्रोत्रं तदपाणिपादम्।
नित्यं विभुं सर्वगतं सुसूक्ष्मं
तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः॥

*Muṇḍaka Up. 1:1: 3 to 6*

**(a)** Translate and name the types of the following compounds:

**(i)** *'mahāśālaḥ'* (line 1)
**(ii)** *'brahmavidaḥ'* (line 4) [4]

**(b)** Translate lines 8 to 11, *'yat tad adreśyam ... dhīrāḥ'.* [4]

**(c)** Give a brief account of how the distinction between higher and lower knowledge was reflected in the Vedic sequence of the four stages of life. [2]

**(ii)** याज्ञवल्क्य किंज्योतिरयं पुरुष इति। आदित्यज्योतिः सम्राडिति होवाच आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतद्याज्ञवल्क्य॥

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतद्याज्ञवल्क्य॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इति अग्निरेवास्य ज्योतिर्भवतीति अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतद्याज्ञवल्क्य॥

मनसैवानुद्रष्टव्यम् नेह नानास्ति किंचन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्।
विरजः पर आकाशादज आत्मा महान्ध्रुवः॥

*Bṛhadāraṇyaka Up. 4:3: 2 to 4* and *4:4: 19, 20*

**(a)** Name two features of the conversation that takes place in lines 1 to 9 which you consider noteworthy. [2]

**(b)** Translate lines 7 to 11, *'astamita ... paśyati'.* [4]

**(c)** How would you sum up the purpose and main subject matter of the Upaniṣads? Are lines 12 and 13 a fair summary of their philosophy? [4]

[Total: 10 + 10 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

**(i)** योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम्॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति॥

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्तारं स पश्यति॥

*Chap. 6, vv 33 to 35; Chap. 13, vv 27 to 29*

**(a)** Translate lines 5 to 8, *'asaṃśayaṃ ... paśyati'.* [4]

**(b)** Translate and name the types of the following compounds:

**(i)** *'madhusūdana'* (line 1)
**(ii)** *'akartāram'* (line 12) [4]

**(c)** Discuss briefly the philosophical implication of line 11. [2]

**(ii)** कथम् —

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥

न त्विति। न त्वेव जातु कदाचिदहं नासं किं त्वासमेव। अतीतेषु देहोत्पत्तिविनाशेषु घटादिषु वियदिव नित्य एवाहमासमित्यभिप्रायः। तथा न त्वं नासीः किं त्वासीरेव। तथा नेमे जनाधिपा नासन्किंत्वासन्नेव। तथा न चैव न भविष्यामः किं तु भविष्याम एव सर्वे वयमतोऽस्माद्देहविनाशात्परमुत्तरकालेऽपि। त्रिष्वपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः। देहभेदानुवृत्त्या बहुवचनं नात्मभेदाभिप्रायेण॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā, Chap. 2, v 12*

**(a)** What are Śaṅkara's explanations of the following phrases from the Bhagavad Gītā verse?

**(i)** *'na jātu'* (line 4)
**(ii)** *'ataḥ param'* (lines 8 and 9) [4]

**(b)** Translate the final two statements, *'triṣvapi ... abhiprāyeṇa'.* (lines 9 and 10) [2]

**(c)** How do you think Śaṅkara's interpretation of this Bhagavad Gītā verse could be refuted? [4]

[Total: 10 + 10 = 20 marks]